लुप्तं, क्ली, ( लुप्+क्तः । ) चौर्य्यधनम् । लोत इति ख्यातम् । इति शब्दरत्नावली ॥ लोपवति, त्रि । यथा,—

"चक्षुष्मानिति लुप्ताक्षं चाण्डालं ब्राह्मणेति च । प्रशंसा निन्दनं द्वेषात् पक्षपात् विशिष्यते ॥"

इति तिथ्यादितत्त्वम् ॥

( यथा च, आर्य्यासप्तशत्याम् । ३६३ ।

"परिवृत्तनाभि लुप्तत्रिवलि श्यामस्तनाग्र-

मलसाक्षि ।

बहुधवलजघनरेखं वपुर्न पुरुषायितं सहते ॥")

लुब कि इ अर्द्दने । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् । ) कि, लुम्बयति लुम्बति । इ, लुम्ब्यते । अर्द्दनं वधः । इति दुर्गादासः ॥

लुब्धः, पुं, ( लुभ+गत्यर्थेति क्तः । ) व्याधः । ( यथा, महाभारते । १६ । ४ । २१ ।

"स संनिरुद्धेन्द्रियवाङ्मनास्तु

शिश्ये महायोगमुपेत्य कृष्णः ।

जराथ तं देशमुपाजगाम

लुब्धस्तदानीं मृगलिप्सुरुग्रः ॥")

लम्पटः । इति शब्दरत्नावली ॥

लुब्धः, त्रि, ( लुभ+क्तः । ) आकाङ्क्षी । इति मेदिनी । धे, १४ ॥ तत्पर्य्यायः । गृध्नुः २ । गर्द्धनः ३ अभिलाषुकः ४ तृष्णक् ५ । इत्यमरः ॥ (यथा, कथासरित्सागरे । ५५ । ३० ।

"लुब्धो यशसि नत्वर्थे भीतः पापान्न शत्रुतः । मूर्खः परापवादेषु नच शास्त्रेषु योऽभवत् ॥" )

लुब्धकः, पुं. ( लुब्ध एव । स्वार्थे कन् । ) व्याधः । इत्यमरः ॥ ('यथा, कथासरित्सागरे । ८ । २४ ।

"आसाकमीदृशं मांसं ददते लुब्धका इति ॥")

लम्पटः । इति लुब्धशब्दार्थदर्शनात् ॥ ( पापुः । यथा, भागवते । ४ । २५ । ५३ ।

"निरृतिर्नाम पश्चाद्द्वास्तया याति पुरञ्जनः । वैशसं नाम विषयं लुब्धकेन समन्वितः ॥" )

लुभ, य इर् गार्द्ध्ये । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् । ) गार्द्ध्यमाकाङ्क्षा । य, लुभ्यति धनं लुब्धः । इर्, अलुभत् अलोभीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

लुभ, श विमोहने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् । ) श, लुभत्यात्मनि कामे च । इति हलायुधः ॥ लोभिता लोब्धा । इति दुर्गादासः ॥ [ क्तप्रत्ययेन निष्पन्नः ॥

लुभितः, त्रि, विमोहितः । विमोहनार्थलुभधातोः

लुल, विमर्द्दने । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) सौत्रधातुरयम् । लुलापः । इति दुर्गादासः ॥

लुलापः, पुं, (लुल्यते इति । लुल विमर्द्दने+भिदादित्वात् अङ् । लुलां आप्नोतीति । आप्+अण् । ) महिषः । इत्यमरः ॥ ( यथा, दुर्गाभक्तितरङ्गिण्याम् ।

"लुलापं खड्गेन छिन्धि छिन्धि ॥" )

( तथास्य पर्य्यायः ।

"महिषो घोटकारिः स्यात्कासरश्च रज-

स्वलः ।

पीनस्कन्धः कृष्णकायो लुलापो यमवाहनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

लुलापकन्दः, पुं, ( लुलापप्रियः कन्दः । ) महिषकन्दः । इति राजनिर्घण्टः ॥

लुलापकान्ता, स्त्री, (लुलापस्य कान्ता ।) महिषी । इति राजनिर्घण्टः ॥

लुलितः, त्रि, ( लुल+क्तः ।) आन्दोलितः । यथा,

"प्रेङ्खोलितस्तरलितो लुलितान्दोलितावपि ॥"

इति भूरिप्रयोगः ॥

(यथा, कथासरित्सागरे । ३७ । ७० ।

"हत्वा रथाश्वांश्चिच्छेद शिरो लुलितकुण्ड-

लम् ॥"

विकीर्णः । इति श्रीधरः ॥ यथा, भागवते । १ । ९ । ३४ ।

"युधि तुरगरजो विधूम्रविष्वक्

कचलुलितश्रमवार्य्यलङ्कृतास्ये ॥"

श्रान्तः । यथा, रामायणे । २ । ६५ । १९ ।

"न स्म विभ्राजते देवी शोकाश्रुलुलितानना ॥"

म्लानः । यथा, आर्य्यासप्तशत्याम् ।

"प्रातर्निद्राति यथा यथालसा लुलितनिःसहैर-

ङ्गैः ।

जामातरि मुदितमनास्तथा तथा सादरा

श्वश्रूः ॥"

उन्मूलितः । यथा, भागवते । ३ । १९ । २४ ।

"विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतत्

यथा नगेन्द्रो लुलितो नभस्वता ॥"

खण्डितः । यथा, तत्रैव । ४ । ६ । १० ।

"छिन्नस्तकाखिलुलितात् पततां विमानात् ॥"

विध्वस्तः । यथा, तत्रैव । ७ । ९ । २३ ।

"येऽस्मत्पितुः कुपितहासविजृम्भितभ्रू-

विस्फूर्ज्जितेन लुलिताः स तु ते निरस्तः ॥")

लुष, स्तेये । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) लोषति । इति दुर्गादासः ॥

लुष, हिंसने । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) सौत्रधातुरयम् । लुषः । इति दुर्गादासः ॥

लुषभः, पुं, ( रोषतीति । रुष हिंसायाम्+"रुषेर्नित्लुष् च ।" उणा० ३ । १२४ । इति अभच् । लुषादेशश्च धातोः । ) मत्तहस्ती । इत्युणादिकोषः ॥

लुह, औ गार्द्ध्ये । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-अनिट् । ) औ, अलुक्षत् । गार्द्ध्यं लब्धुमिच्छा । लोहति धनं लोकः । इति दुर्गादासः ॥

लू, ञ गि छिदि । इति कविकल्पद्रुमः ॥ ( क्र्या०-उभ०-सक०-अनिट् । ) ञ गि, लुनाति लुनीते । लूनः लूनिः । इति दुर्गादासः ॥

लूता, स्त्री, ( लुनातीति । लू+बाहुलकात् तन् । गुणाभावश्च । ) कीटविशेषः । माकड्सा इति भाषा । तत्पर्य्यायः । तन्तुवायः २ ऊर्णनाभः ३ मर्कटकः ४ । इत्यमरः ॥ मर्कटः ५ लूतिका ६ ऊर्णनाभिः ७ शनकः ८ तन्त्रवायः ९ । इति शब्दरत्नावली ॥ ( यथा, आर्य्यासप्तशत्याम् । ५०४ ।

"लूतातन्तुनिरुद्धद्वारः शून्यालयः पतत्पतगः ।

पथिके तस्मिन्नश्रुलपिहितमुखो रोदितीव

सखि ! ॥" )

पिपीलिका । रोगविशेषः । इति मेदिनी । ते, ५२ ॥ शेषस्य पर्य्यायः । मर्म्मव्रणः २ व्रणः ३ । इति राजनिर्घण्टः ॥ तद्रोगस्य निदानादि लूतानां जन्तुविशेषाणामुत्पत्तिं संख्याञ्चाह ।

"यस्माल्लूनतृणं प्राप्ता मुनेः प्रस्वेदविन्दवः । तेभ्यो जातास्ततो लूता इति ख्यातास्तु

षोड़श ॥"

अत्र सुश्रुतः ।

"विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम् ।

वशिष्ठं कोपयमास गत्वाश्रमपदं किल ॥

कुपितस्य मुनेस्तस्य ललाटे स्वेदविन्दवः ।

अपतन् दर्शनादेव ह्यधस्तात्तीव्रवर्च्चसः ॥

लूते तृणे महर्षेस्तु धेन्वर्थे संभृतेऽपि च ।

ततो जातास्त्विमा घोरा नानारूपा महा-

विषाः ।

तासामष्टौ कष्टसाध्या वर्ज्यास्तावत्य एव हि ॥"

तत्र त्रिमण्डलाप्रभृतयोऽष्ट कष्टसाध्याः । सौवर्णिकाप्रभृतयोऽष्टावसाध्याः । तासां सामान्यतो दंशलक्षणमाह ।

"ताभिर्दष्टे दंशकोऽप्यप्रवृत्तिः क्षतजस्य च ।

ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदो-

षजाः ॥

पिड़िका विविधाकारा मण्डलानि महान्ति च ।

शोथा महान्तो मृदवो रक्ताः श्यावाश्चला-

स्तथा ।

सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम् ॥"

दंशकोऽप्यदंशमध्ये पूतिभावः ।

"दंशमध्ये तु यत् कृष्णं श्यावं वा जालकावृ-

तम् ।

दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम् ।

दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्द्दिशेत् ॥"

सौवर्णिकादयोऽष्टावसाध्यास्तासां

लक्षणमाह ।

"शोथः श्वेतासिता रक्ता पीता च पिड़िका

ज्वरः ।

प्राणान्तिको भवेद्दाहः श्वासो हिक्का शिरो-

ग्रहः ॥ * ॥

तस्यौषधं यथा,—

"रजनीयुग्मपत्तङ्गमञ्जिष्ठानागकेशरैः ।

शीताम्बुपिष्टैरालेपः सद्यो लूतां विनाशयेत् ॥"

अपि च ।

"अभयां रोचनां कुष्ठमर्कपुष्पं तथोत्पलम् ।

नलवेतसमूलानि गरलं सुरसां तथा ॥

सकलिङ्गं समञ्जिष्ठामनन्ताञ्च शतावरीम् ।